**अग्निदीपन** त्रि० अग्निं जठरस्थानलं दीपयति दीप-णिच्-ल्यु ६त० । जठरानलोद्दीपके पदार्थमात्रे औषधभेदे न० ।

**अग्निदीप्ता** स्त्री अग्निर्जठरानलोद्दीप्तः सेवनात् यस्याः । ज्योतिष्मतीलतायाम् ।

**अग्निदूत** पु० अग्निर्दूत इव यस्मिन् यस्य वा ऽऽवाहकत्वात् । अग्न्याधानानन्तरमाहूतदेवके यज्ञादौ, "यमं ह "यज्ञो गच्छ-त्यग्निदूतो अरं कृत" इति वेदः तत्राहूते देवे च अतएव यज्ञे अग्नेर्दूतत्वमग्निस्थापने मन्त्रे "अग्निं दूतं पुरोदधे इति, 'अग्निं दूतं वृणीमहे इति' च श्रुतावुक्तम् ।

**अग्निदैवा** स्त्री अग्निर्दैवोऽस्याः । कृत्तिकातारायाम् "अश्वि-यमदहनशशिकमलजम्बूलभ्ददितिजीवफणिपितर इति" ज्योतिषे अश्विन्यादीनां क्रमशोऽश्व्यादिदेवतात्वकथनात् तत्क्रमात् कृत्तिकाया अग्निदैवत्यम् ।

**अग्निध्** पु० अग्निं दधाति मन्त्रविधिना स्थापयति धा-क्विप् नि० आलोपः ६त० । अग्न्याधानकर्त्तरि । "अध्वर्यु वा मधुपाणिं सुहस्तमग्निधं वा धृतदक्षं दमूनसमिति" वेदः ।

**अग्निधान** न० अग्निर्विधिना धीयतेऽस्मिन् धा-आधारे ल्युट् ६त० । अग्निहोत्रगृहे "पदं कृणुते अग्निधाने" इति वेदः । [तारावह्नितारकादयोऽप्यत्र ।

**अग्निनक्षत्र** न० ६त० । अग्निदैवत्ये कृत्तिकानक्षत्रे अग्नि-

**अग्निनयन** न० अग्नेर्नयनं मन्त्रविधिना संस्कारः नी-भावे ल्युट् ६त० । अग्निसंस्काररूपे विधिना अग्निप्रणयने ६त० । अग्निनेत्रे न० । [अग्निजारवृक्षे ।

**अग्निनिर्यास** अग्नेः जठरानलस्येव दीपको निर्यासोऽस्य ।

**अग्निनेत्र** पु० अग्निर्नेता हुतहविःप्रापयिता यस्य अच् समा० । देवतामात्रे । "हव्यं वहति देवानामिति" श्रुतौ हि तस्य देवेभ्यो हव्यवाहकत्वमुक्तम् । ६त० । वह्निनयने न० ।

**अग्निपद** न० ६त० । अग्न्याधानस्थाने अग्निबोधकशब्दे च । तत्र दीयते इत्यर्थे व्युष्टादित्वात् अण् आग्निपदम् ।

**अग्निपरिक्रिया** स्त्री अग्नेः परिक्रिया परिचर्य्या परि+कृ-भावे श ६त० । अग्निचर्य्यायां होमादिकरणे । [पर्व्वतभेदे ।

**अग्निपर्व्वत** पु० अग्निसाधनं पर्व्वतः । स्वतः अग्निसम्पादके

**अग्निपुच्छ** पु० न० अग्नेरग्न्याधानस्थानस्य पुच्छ इव । आहिताग्निस्थानात् पृष्ठभागे । "दक्षिणत आवहनीयस्योप-विशेदग्निपुच्छस्य सान्निचित्यायामिति" गृह्यम् ।

**अग्निपुराण** न० अग्निना प्रोक्तं पुराणम् । वेदव्यास प्रणी-तेषु अष्टादशसु महापुराणेषु मध्येऽष्टमे वह्निनोक्ते पुराणभेदे तद्विवरणं यथा ।

"आग्नेयमष्टमं स्मृतमिति" भागवते । "परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम् । चतुर्द्दश सहस्राणि परं पञ्चशता-धिकम्" इति ब्रह्मवैवर्त्ते । तत्राभिधेयसंक्षेपः । भग-वतोऽवताराः, सृष्टिप्रकारः, विष्णुपूजा, अग्निपूजा, मुद्रादिलक्षणम्, दीक्षा, अभिषेकः, मण्डपलक्षणम् कुश-मार्ज्जनाविधिः, पवित्रारोपः, देवतायतनादिनिर्म्माणप्रकारः, शालग्रामलक्षण-पूजे, देवप्रतिष्ठानियामकदीक्षा, देवप्रति-ष्ठाविधिः, ब्रह्माण्डस्वरूपं, गङ्गादितीर्थमाहात्म्यं, द्वीपवर्णनम् ऊर्द्धाधोलोकवर्णना, ज्योतिश्चक्रस्वरूपम् । युद्धजयोपाय-षट्कर्म्मविधानम्, यन्त्रमन्त्रौषधप्रकारः कुब्जिकार्च्चनाविधिः, कोटिहोमविधानम्, ब्रह्मचर्य्यधर्म्माः, श्राद्धकल्पः ग्रहयज्ञः, वैदिकस्मार्त्तकर्म्मणी, प्रायश्चित्तम्, तिथिभेदे व्रतभेदः, वार-व्रतनक्षत्रव्रते, मासव्रतम्, दीपदानविधिः, नूतनव्यूहा दम्भादि, नरकनिरूपणम्, दानव्रतम्, नाडीचक्रम्, सन्ध्या-विधिः, गायत्र्यर्थः, शिवस्तोत्रं, राज्याभिषेकः, राजधर्म्माः, राजाध्येयशास्त्रम्, शुभाशुभशकुनादि, मण्डलादि, रण-दीक्षाविधिः, श्रीरामनतिः, रत्नलक्षणम्, धनुर्विद्या, व्यव-हारविधिः, देवासुरयोर्युद्धम्, आयुर्वेदः, गजादिचिकित्सा, पूजाप्रकारः । शान्तिविधिः, छन्दःशास्त्रम्, साहित्यं, शिष्टानुशासनम्, सृष्ट्यादिप्रलयवर्णने, शारीरकरूपं, नरकवर्णनम्, योगः, ब्रह्मज्ञानम्, पुराणमाहात्म्यञ्च ॥ एते विषयाः संक्षेपेण दर्शिता विस्तरस्तत्रैव द्रष्टव्यः ॥

**अग्निप्रणयन** न० अग्नेः प्रणयनं मन्त्रपूर्व्वकं संस्कारः प्र+नी-भावे ल्युट् ६त० । शास्त्रोक्तविधानेन वह्निसंस्कारभेदे "दक्षिणत आहवनीयेऽवस्थितस्याग्नेः सौमिकायामुत्तरवेद्यां नयनं यदस्ति तदेतदग्निप्रणयन-मिति" गृह्यम् ।

**अग्निप्रस्कन्दन** न० ६त० । यथाविधानमग्निकार्य्यरूपहोमा-करणे "प्रजाश्च यौवनं प्राप्य विनशिष्यन्त्यनो ! तव । अग्निप्रस्कन्दनपरस्त्वञ्चाप्येवं भविष्यसीति, स्वपुत्रमनुं प्रति ययातिवाक्यम् भार० आदि प० ।

**अग्निप्रस्तर** पु० अग्निं प्रस्तृणाति स्तृ-अच् अग्नेर्वा प्रस्तरः । (चकमकीति) ख्याते वह्न्युत्थापके प्रस्तरखण्डे ।

**अग्निबाहु** पु० अग्नेर्बाहुरिव दीर्घशिखत्वात् । धूमे ।

**अग्निभ** न० अग्निरिव भाति भा-क । स्वर्णे अग्नितुल्यवर्णत्वा-त्तस्य तथात्वम् । वह्नितुल्यवर्णपदार्थे त्रि० । भ० नक्षत्रं ६त० । अग्निदैवत्ये कृत्तिकानक्षत्रे न० ।

**अग्निभू** पु० अग्नेर्भवति भू-क्विप् । कार्त्तिकेये अग्निकुमार